हस्तसिद्धिः, स्त्री, ( हस्तस्य सिद्धिः । ) भृतिः । वेतनम् । यथा,—
"प्रतीकारमिमं कृत्वा शीतादेस्ताः प्रजाः पुनः ।
वार्त्तोपायं ततश्चक्रुर्हस्तसिद्धिञ्च कर्म्मजाम् ॥"
इति विष्णुपुराणे १ अंशे ६ अध्यायः ॥
हस्तसिद्धिं हस्ताभ्यां साध्यां सिद्धिं भृतिं तामेवाह कर्म्मजां तत्कर्म्मनिमित्ताम् । इति तट्टीका ॥
करेण साधनञ्च ॥

हस्तसूत्र, क्ली, (हस्तस्य सूत्रम् ।) वलयम् । यथा,
"कटको वलयं पारिहार्य्यावापौ तु कङ्कणम् ।
हस्तसूत्रं प्रतिसरः ऊर्म्मिका त्वङ्गुलीयकम् ॥"
इति हेमचन्द्रः ॥
( विवाहादिकालीनमङ्गलार्थनिबद्धकरसूत्रम् । यथा, कुमारे । ७ । २५ ।
"बबन्ध चास्राकुलदृष्टिरस्याः
स्थानान्तरे कल्पितसन्निवेशम् ।
धात्र्यङ्गुलीभिः प्रतिसार्य्यमाण-
मूर्णामयं कौतुकहस्तसूत्रम् ॥")

हस्ता, पुं, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतत्रयोदशनक्षत्रम् । तत्तु हस्ताकृतिपञ्चतारात्मकम् । अस्याधिदेवता दिनकृत् । जन्मकालीनोऽयं जघन्यगुणदायकः । इति ज्योतिस्तत्त्वम् ॥*॥ तदंशेन लग्ननिरूपणं यथा,—
"मस्तकोपरि कराकृती करे
तिष्ठतीन्दुमुखि ! बाणतारके ।
लिप्तिकाः शरकुपक्षसंज्ञकाः
नायकासनविलग्नतो गताः ॥" दं ३।२५ ।
इति कालिदासकृतराचिलग्ननिरूपणग्रन्थः ॥*॥
तत्र जातफलम् ।
"दाता यशस्वी सुतरां मनस्वी
भूदेवदेवार्च्चनकृच्चयश्च ।
प्रसूतिकाले किल यस्य हस्ता
हस्तस्थिता तस्य समस्तसम्पत् ॥"
इति कोष्ठीप्रदीपः ॥

हस्ताङ्गुलिः, पुं, (हस्तस्य अङ्गुलिः ।) करशाखा । यथा,—
"हस्ताङ्गुलय एवास्युरायुर्दा ललिताः शुभाः ।"
इति गारुड़े ६६ अध्यायः ॥
अस्य विवरणं बाहुशब्दे द्रष्टव्यम् ॥

हस्तामलकं, क्ली, ( हस्तस्थितं आमलकम् । ) करस्थितामलकीफलम् । ( यथा, रामायणे ।
"त्वया दृष्टं जगत्सर्व्वं हस्तामलकवत् सदा ॥")
वेदान्तग्रन्थविशेषः । तन्निरुच्यते । श्रीमच्छङ्कराचार्य्यस्य दिग्विजयसमये पथिमध्ये कश्चित् बालकं प्रति प्रश्नः ।
"कस्त्वं शिशो ! कस्य कुतोऽसि गन्ता
किं नाम ते त्वं कुत आगतोऽसि ।
एतद्वद त्वं मम सुप्रसिद्धं
मत्प्रीतये प्रीतिविवर्द्धनोऽसि ॥"
बालकस्योत्तरम् ।
"नाहं मनुष्यो न च देवयक्षौ
न ब्राह्मणक्षत्रियवैश्यशूद्राः ।
न ब्रह्मचारी न गृही वनस्थो
भिक्षुर्न चाहं निजबोधरूपः ॥"
एतस्य श्लोकस्य शङ्कराचार्य्येण भाष्यं न कृतम् ॥
"निमित्तं मनश्चक्षुरादिप्रवृत्तौ
निरस्ताखिलोपाधिराकाशकल्पः ।
रविर्लोकचेष्टानिमित्तं यथा यः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥१॥
यमग्न्युष्णवन्नित्यबोधस्वरूपं
मनश्चक्षुरादीन्यबोधात्मकानि ।
प्रवर्त्तन्त आश्रित्य निष्कम्पमेकं
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ २ ॥
मुखाभासको दर्पणे दृश्यमानो
मुखत्वात् पृथक्त्वेन नैवास्ति वस्तु ।
चिदाभासको धीषु जीवोऽपि तद्वत्
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ३ ॥
यथा दर्पणाभाव आभासहानौ
मुखं विद्यते कल्पनाहीनमेकम् ।
तथा धीवियोगे निराभासको यः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ४ ॥
मनश्चक्षुरादेर्वियुक्तः स्वयं यो
मनश्चक्षुरादेर्मनश्चक्षुरादिः ।
मनश्चक्षुरादेरगम्यस्वरूपः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ५ ॥
य एको विभाति स्वतः शुद्धचेताः
प्रकाशस्वरूपोऽपि नानेव धीषु ।
शरावोदकस्थो यथा भानुरेकः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ६ ॥
यथानेकचक्षुः प्रकाशो रविर्न
क्रमेण प्रकाशीकरोति प्रकाश्यम् ।
अनेका धियो यस्तथैकप्रबोधः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ७ ॥
विवस्वत्प्रभातं यथा रूपमक्षं
प्रगृह्णाति नाभातमेवं विवस्वान् ।
यथा भात आभासयत्यक्षमेकः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ८ ॥
यथा सूर्य्य एकोऽप्स्वनेकश्चलासु
स्थिरास्वप्यनन्यद्विभाव्यस्वरूपः ।
चलासु प्रभिन्नासु धीष्वेक एवं
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ९ ॥
घनच्छन्नदृष्टिर्घनच्छन्नमर्कं
यथा निष्प्रभं मन्यते चातिमूढः ।
तथा बद्धवद्भाति यो मूढदृष्टेः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ १० ॥
समस्तेषु वस्तुष्वनुस्यूतमेकं
समस्तानि वस्तूनि यन्न स्पृशन्ति ।
वियद्वत् सदा शुद्धमच्छस्वरूपं
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ११ ॥
उपाधौ यथा भेदता सन्मणीनां
तथा भेदता बुद्धिभेदेषु तेषु ।
यथा चन्द्रकाणां जले चञ्चलत्वं
तथा चञ्चलत्वं तवापीह विष्णो ॥"१२॥
इति हस्तामलकं समाप्तम् ॥

हस्तिकं, क्ली, (हस्तिनां समूहः । कन् ।) हस्तिसमूहः । तत्पर्य्यायः । गजता २ । इति शब्दरत्नावली ॥

हस्तिकक्ष्यः, पुं, ( हस्ती कक्षे यस्य । ) सिंहः । व्याघ्रः । इति केचित् ॥

हस्तिकन्दः, पुं, ( हस्तिनः पद इव कन्दो यस्य ।) बृहत्कन्दविशेषः । तत्पर्य्यायः । हस्तिपत्रः २ स्थूलकन्दः ३ अतिकन्दकः ४ बृहत्पत्रः ५ अतिपत्रः ६ हस्तिकर्णः ७ सुकर्णकः ८ स्वच्छोपारिः ९ कुष्ठहन्ता १० गिरिवासी ११ नागाश्रयः १२ गजकन्दः १३ नागकन्दः १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयत्वग्दोषश्रमकुष्ठविषवीसर्पनाशित्वञ्च । इति राजनिर्घण्टः ॥

हस्तिकरञ्जः, पुं, ( हस्तीव महान् करञ्जः । ) महाकरञ्जः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य महाकरञ्जशब्दे ज्ञातव्याः ॥ )

हस्तिकर्णः, पुं, ( हस्तिनः कर्णमिव पर्णमस्य । ) एरण्डः । पलाशभेदः । गणदेवताभेदः । इति मेदिनी ॥ हस्तिकन्दः । रक्तैरण्डः । इति राजनिर्घण्टः ॥ हस्तिकर्णपलाशस्य गुणाः ।
"हस्तिकर्णः परं हृद्यो मेधायुर्बलवर्द्धनः ।"
इति राजवल्लभः ॥
अपि च ।
श्रीहरिरुवाच ।
"हस्तिकर्णस्य वै मूलं गृहीत्वा चूर्णयेद्धर ! ।
सर्व्वरोगविनिर्म्मुक्तं चूर्णं पलशतं शिव ! ॥
सक्षीरं भक्षितं कुर्य्यात् समाहेन वृषध्वज ! ।
नरं श्रुतिधरं शूरं मृगेन्द्रगतिविक्रमम् ॥
पद्मगौरप्रतीकाशं युक्तं दशशतायुषा ।
षोड़शाब्दाकृतिं रुद्र ! सततं दुग्धभोजितम् ॥
मधुसर्पिःसमायुक्तं जग्धमायुष्करं भवेत् ।
तज्जग्धं मधुना सार्द्धं दशवर्षसहस्रिणम् ॥
कुर्य्यान्नरं श्रुतिधरं प्रमदाजनवल्लभम् ।
दध्ना नित्यं भक्षितन्तु वज्रदेहकरं शिव ! ॥
कृष्णकेशसमायुक्तं नरं वर्षसहस्रिणम् ।
तच्च काञ्जिकसंयुक्तं नरं कुर्य्याच्च भक्षितम् ॥
शतवर्षं दिव्यदेहं वलीपलितवर्ज्जितम् ।
जग्धं त्रिफलया युक्तं चक्षुष्मन्तं करोति वै ॥
अन्धः पश्येत्तु चूर्णस्य शाल्यस्यैव तु भक्षणात् ।
महिषक्षीरसंयुक्तं तल्लेपः कृष्णकेशकृत् ॥
खल्लीटस्य च वै केशा भवन्ति वृषभध्वज ! ।
तैलसंयुक्तेन चूर्णेन वलीपलितवर्ज्जितम् ॥
तद्दर्शनमात्रेण सर्व्वरोगैः प्रमुच्यते ।
सच्छागक्षीरचूर्णेन दृष्टिः षण्मासतोऽञ्जनात् ॥"
इति गारुड़े १० अध्यायः ॥

हस्तिकर्णकः, पुं, ( हस्तिनः कर्ण इव पर्णमस्य । कप् ।) किंशुकभेदः । इति शब्दरत्नावली ॥

हस्तिकर्णदलः, पुं, (हस्तिनः कर्ण इव दलमस्य । पलाशभेदः । इत्यमरमाला ॥

हस्तिकोलिः, पुं, (हस्तीव कोलिः ।( वदरीभेदः । तत्पर्य्यायः । गोपघोण्टा २ घोण्टा ३ वदरीच्छदा ४ । इति रत्नमाला ॥